This Question Paper consists 35 questions and 4 printed pages.
अस्मिन् प्रश्नपत्रे 35 प्रश्नाः एवम् 4 मुद्रित पृष्ठाः सन्ति ।

Roll No. ☐☐☐☐☐☐☐☐☐☐☐
अनुक्रमाङ्कः

Code No. 62/S/N
गूढसंख्या

SET No. A
स्तबकः

# SANSKRIT SAHITYA
# संस्कृतसाहित्यम्
# (248)

Day and Date of Examination
(परीक्षादिवसः दिनाङ्कश्च) ______________________

Signature of two Invigilators
(निरीक्षकयोः हस्ताक्षरम्)
1. ______________________
2. ______________________

**सामान्या निर्देशाः :**

1 अनुक्रमाङ्कः प्रश्नपत्रस्य प्रथमपृष्ठे नूनं लेख्यः ।

2 निरीक्ष्यताम् यत् प्रश्नपत्रस्य पृष्ठसंख्या प्रश्नानां च संख्या प्रथमपृष्ठस्य प्रारम्भे प्रदत्तसंख्या समाना न वा । प्रश्नक्रमः सम्यग् न वा ।

3 वस्तुनिष्ठप्रश्ननाम् (क), (ख), (ग), (घ) एषु विकल्पेषु युक्तम् उत्तरं चित्वा उत्तरपत्रे लेख्यम् ।

4 समेषां प्रश्नानाम् उत्तराणि निर्धारितसमये एवं लेख्यानि ।

5 उत्तरपत्रे आत्मपरिचयात्मकं लेखनम् अथवा निर्दिष्टस्थानं विहाय अन्यत्र क्वापि अनुक्रमाङ्कलेखनं सर्वथा वर्जितमस्ति ।

6 स्वस्य उत्तरपत्रे प्रश्नपत्रस्य गूढसंख्या नूनं लेख्या ।

7 समेषां प्रश्नानाम् उत्तराणि संस्कृतभाषया एवं लेख्यानि ।



UNNATI EDUCATIONS
9899436384, 9654279279

# SANSKRIT SAHITYA
# संस्कृतसाहित्यम्
# (248)

**परीक्षासमयावधिः (Time) होरात्रयम् (3 Hrs)]** **[पूर्णाङ्काः (Full Marks) : 100**

---

**निर्देशाः :**

**(1)** अस्मिन् प्रश्नपत्रे [A] भागे **10**, [B] भागे **10**, [C] भागे **10** [D] भागे **5** इति आहत्य **35** प्रश्नाः सन्ति ।

**(2)** प्रश्नस्य दक्षिणे पार्श्वे संख्यासु (अङ्काः×प्रश्नाः=पूर्णाङ्काः) इति एवम् अङ्कान् निर्दिशति ।

**(3)** **सर्वे** प्रश्नाः **अनिवार्याः** ।

---

[A] दशानां प्रश्नानां युक्तं विकल्पं चिनुत । **1×10=10**

(1) 'तस्य तृतीया गतिर्भवति' – तृतीया गतिः का ?

(क) आनन्दः (ख) मोक्षः

(ग) नाशः (घ) भोगः

(2) वेतालः कं कथां श्रावयति स्म ?

(क) चन्द्रगुप्तम् (ख) दुष्यन्तम्

(ग) धवलचन्द्रम् (घ) त्रिविक्रमसेनम्

(3) आलङ्कारिकनये शब्दस्य कति भेदाः ?

(क) त्रयः (ख) चत्वारः

(ग) पञ्च (घ) षट्

(4) वंशस्थविलम् इति छन्दसि कति अक्षराणि सन्ति ?

(क) अष्टौ (ख) दश

(ग) द्वादश (घ) चतुर्दश

(5) 'गुणा गुणानुबन्धित्वात्तस्य सप्रसवा इव' – इत्यत्र कः अलङ्कारः ?

(क) उपमा (ख) रूपकम्

(ग) उत्प्रेक्षा (घ) दृष्टान्तः



UNNATI EDUCATIONS
9899436384, 9654279279

(6) उपरूपकस्य कति भेदाः ?

(क) १५ (ख) १६

(ग) १७ (घ) १८

(7) हनुमता किं रूपं धृतमासीत् ?

(क) ब्राह्मणरूपम् (ख) भिक्षुरूपम्

(ग) मनुष्यरूपम् (घ) सन्न्यासिरूपम्

(8) 'राज्यार्हावमरप्रख्यौ कथं देशामिहागतौ' – इति कस्योक्तिः ?

(क) हनुमतः (ख) लक्ष्मणस्य

(ग) रामस्य (घ) सुग्रीवस्य

(9) कर्णभारम् इत्यस्य रचयिता कः ?

(क) भारविः (ख) भासः

(ग) व्यासः (घ) सुबन्धुः

(10) 'न हि प्रियं प्रवक्तुमिच्छन्ति मृषा हितैषिणः' – कस्य वचनम् ?

(क) द्रौपद्याः (ख) दुर्योधनस्य

(ग) युधिष्ठिरस्य (घ) वनेचरस्य

**[B]** दशानां यथानिर्देशम् उत्तराणि लिखत । **2×10=20**

(1) गुणस्याभरणं किम् ? गुणश्च कस्याभरणम् ? 1+1

(2) 'सुदर्शनधीः' इति कथायां धूर्तस्य नाम किम् ? स काम् आराधितवान् ? 1+1

(3) कति वेदाङ्गानि ? तेषां नामानि लिखत । 1+1

(4) 'यतो धर्मस्ततो जयः' इति कथाधारेण धर्मबुद्धयः कान् केन भावेन पश्यन्तीति इति लिखत । 1+1

(5) मम्मटाचार्यमते काव्यरचनायां कति हेतवः ? के च ते ? 1+1

(6) रामलक्ष्मणयोः नेत्रे कीदृशे स्तः ? तयोः स्कन्धौ च कीदृशौ ? 1+1

(7) कर्ण इन्द्राय किं दत्तवान् ? प्रतिदानरूपेण इन्द्रेण च किं दत्तम् ? 1+1

(8) वज्रमुखः कः ? स किं कृतवान् ? 1+1

(9) 'वसुनि वाञ्छन्न वशी न मन्युना' – इत्यत्र वशी कः ? किमर्थं स वशी इत्युच्यते ? 1+1

(10) दुर्योधनः कथं किमर्थञ्च पृथिवीं जेतुं समीहते ? 1+1



UNNATI EDUCATIONS
9899436384, 9654279279

**[C]** दश अनतिदीर्घोत्तरैः समाधत्त । **4×10=40**

(1) केषामौषधमस्ति केषाञ्च नास्तीति सुभाषिताधारेण लिखत ।

(2) आलस्यं हि मनुष्याणां शरीरस्थो महान् रिपुः ।

नास्त्युद्यमसमो बन्धुः कुर्वाणो नावसीदति ॥ इति श्लोकं व्याख्यात ।

(3) 'पिपीलिका चुम्बति चन्द्रमण्डलमि' ति समस्यां समाधत्त ।

(4) 'मूर्खानां न समादरः' इति कथाधारेण मूर्खानां भोजनवृत्तान्तं लिखत ।

(5) सङ्केतग्रहस्य यथेच्छं चत्वार उपायाः सोदाहरणं प्रतिपादनीयाः ।

(6) रामलक्ष्मणयोर्धनुर्विषये बाणविषये च संक्षेपेण लिखत ।

(7) तत्तस्य वाक्यं निपुणं निशम्य

प्रहृष्टरूपः पवनात्मजः कपिः ।

मनः समाधाय जयोपपत्तौ

सख्यं तदा कर्तुमियेष ताभ्याम् ॥ इति श्लोकं व्याख्यात ।

(8) 'हुतं च दत्तं तथैव तिष्ठति' – इति कर्णवाक्यं सप्रसङ्गं व्याख्यात ।

(9) कदा नृपेष्वमात्येषु च सर्वसम्पदः रतिं कुरुते इति सश्लोकं लिखत ।

(10) दुर्योधनेन कुरुजनपदस्य कीदृशं कल्याणं कृतम् ? कथं दुर्योधनं प्रति मेदिनी अनुरक्ता ?

**[D]** पञ्च दीर्घोत्तरैः समाधेयाः । **6×5=30**

(1) 'सुदर्शनधीः' इति कथायाः सारं लिखत ।

(2) उपमालङ्कारं संक्षेपेण लिखत ।

(3) 'एवं गुणगणयुक्ता यस्य स्युः कार्यसाधकाः' – कस्य विषये केन इदमुक्तम् ? तस्य गुणान् लिखत ।

(4) 'भो अङ्गराज ! वञ्चितः खलु भवान्' – कस्योक्तिः ? किमर्थम् अङ्गराजा वञ्चितः इति स्वभाषया लिखत ।

(5) दुर्योधनस्य धर्माचरणं स्वभाषया संक्षेपेण लिखत ।

---



UNNATI EDUCATIONS
9899436384, 9654279279